# सद्दर्शनम्



**Saddarśanam by Srī Ramaṇa Maharṣi**

सत्प्रत्ययाः किं नु विहाय सन्तं

हृद्येष चिन्तारहितो हृदाख्यः ।

कथं स्मरामस्तममेयमेकं

तस्य स्मृतिस्तत्र दृढैव निष्ठा ॥ १ ॥

satpratyayāḥ kiṁ nu vihāya santaṁ
hṛdeṣa cintārahito hṛdākhyaḥ |
kathaṁ smarāmastamameyamekaṁ
tasya smṛtistatra dṛḍhaiva niṣṭhā || 1 ||

मृत्युञ्जयं मृत्युभियाश्रितानाम्

अहंमतिर्मृत्युमुपैति पूर्वम् ।

अथ स्वभावादमृतेषु तेषु

कथं पुनर्मृत्युधियोऽवकाशः ॥ २ ॥

mṛtyuñjayaṁ mṛtyubhiyāśratānām
ahammatirmṛtyumupaiti pūrvam |
atha svabhāvādamṛteṣu teṣu
kathaṁ punarmṛtyudhiyo'vakāśaḥ || 2 ||

सर्वैर्निदानं जगतोऽहमश्च

वाच्यः प्रभुः कश्चिदपारशक्तिः ।

चित्रेऽत्र लोक्यं च विलोकिता च

पटः प्रकाशोऽप्यभवत् स एकः ॥ ३ ॥

sarvairnidānaṁ jagato'hamaśca
vācyaḥ prabhuḥ kaścidapāraśaktiḥ |
citre'tra lokyaṁ ca vilokitā ca
paṭaḥ prakāśo'pyabhavat sa ekaḥ || 3 ||

आरभ्यते जीवजगत्परात्म -

तत्त्वाभिधानेन मतं समस्तम् ।

इदं त्रयं यावदहंमतिः स्यात्

सर्वोत्तमाऽहंमतिशून्यनिष्ठा ॥ ४ ॥

ārabhyate jīvajagatparātma -
tattvābhidhānena mataṁ samastam ।
idaṁ trayaṁ yāvadahammatiḥ syāt
sarvottamā'hammatiśūnyaniṣṭhā ।। 4 ।।

सत्यं मृषा वा चिदिदं जडं वा

दुःखं सुखं वेति मुधा विवादः ।

अदृष्टलोका निरहंप्रतीतिः

निष्ठाऽविकल्पा परमाऽखिलेष्टा ॥ ५ ॥

satyaṁ mṛṣā vā cididaṁ jaḍaṁ vā
duḥkhaṁ sukhaṁ veti mudhā vivādaḥ ।
adṛṣṭalokā nirahampratītiḥ
niṣṭhā'vikalpā paramā'khileṣṭā ।। 5 ।।

सरूपबुद्धिर्जगतीश्वरे च

सरूपधीरात्मनि यावदस्ति ।

अरूप आत्मा यदि कः प्रपश्येत्

सा दृष्टिरेकाऽनवधिर्हि पूर्णा ॥ ६ ॥

sarūpabuddhirjagatīśvare ca
sarūpadhīrātmani yāvadasti ।
arūpa ātmā yadi kaḥ prapaśyet
sā dṛṣṭirekā'navadhirhi pūrṇā ।। 6 ।।

यत्पञ्चकोशात्मकमस्ति देहं

तदन्तरा किं भुवनं चकास्ति ।

देहं विना पञ्चविधं तदेतत्

पश्यन्ति के वा भुवनं भणन्तु ॥ ७ ॥

yatpañcakośātmakamasti dehaṁ
tadantarā kiṁ bhuvanaṁ cakāsti |
dehaṁ vinā pañcavidhaṁ tadetat
paśyanti ke vā bhuvanaṁ bhaṇantu || 7 ||

शब्दादिरूपं भुवनं समस्तं

शब्दादिसत्तेन्द्रियवृत्तिभास्या ।

सत्तेन्द्रियाणां मनसो वशे स्या-

न्मनोमयं तद्भुवनं वदामः ॥ ८ ॥

śabdādirūpaṁ bhuvanaṁ samastaṁ
śabdādisattendriyavṛttibhāsyā |
sattendriyāṇāṁ manaso vaśe syā-
nmanomayaṁ tadbhuvanaṁ vadāmaḥ || 8 ||

धिया सहोदेति धियाऽस्तमेति

लोकस्ततो धीप्रविभास्य एषः ।

धीलोकजन्मक्षयधाम पूर्णम्

सद्वस्तु जन्मक्षयशून्यमेकम् ॥ ९ ॥

dhiyā sahodeti dhiyā'astameti
lokastato dhīpravibhāsya eṣaḥ |
dhīlokajanmakṣayadhāma pūrṇam
sadvastu janmakṣayaśūnyamekam || 9 ||

भवन्तु सद्दर्शनसाधनानि
परस्य नामाकृतिभिः सपर्याः ।
सद्वस्तुनि प्राप्ततदात्मभावा
निष्ठैव सद्दर्शनमित्यवेहि ॥ १० ॥

bhavantu saddarśanasādhanāni
parasya nāmākṛtibhiḥ saparyāḥ |
sadvastuni prāptatadātmabhāvā
niṣṭhaiva saddarśanamityavehi || 10 ||

द्वन्द्वानि सर्वाण्यखिलास्त्रिपुट्यः
किञ्चित्समाश्रित्य विभान्ति वस्तु ।
तन्मार्गणे स्याद्गलितं समस्तं
न पश्यतां सच्चलनं कदापि ॥ ११ ॥

dvandvāni sarvāṇyakhilāstripuṭyaḥ
kiñcitsamāśritya vibhānti vastu |
tanmārgaṇe syādgalitaṁ samastaṁ
na paśyatāṁ saccalanaṁ kadāpi || 11 ||

विद्या कथं भाति न चेदविद्या
विद्यां विना किं प्रविभात्यविद्या ।
द्वयं च कस्येति विचार्य मूल-
स्वरूपनिष्ठा परमार्थविद्या ॥ १२ ॥

vidyā kathaṁ bhāti na cedavidyā
vidyāṁ vinā kiṁ pravibhātyavidyā |
dvayaṁ ca kasyeti vicārya mūla-
svarūpaniṣṭhā paramārthavidyā || 12 ||

बोद्धारमात्मानमजानतो यो

बोधः स किं स्यात्परमार्थबोधः ।

बोधस्य बोध्यस्य च संश्रयं स्वं

विजानतस्तद् द्वितयं विनश्येत् ॥ १३ ॥

boddhāramātmānamajānato yo
bodhaḥ sa kiṁ syātparamārthabodhaḥ |
bodhasya bodhyasya ca saṁśrayaṁ svaṁ
vijānatastad dvitayaṁ vinaśyet || 13 ||

निद्रा न विद्या ग्रहणं न विद्या

गृह्णाति किञ्चन्न यथार्थबोधे ।

निद्रापदार्थग्रहणेतरा स्यात्

चिदेव विद्या विलसन्त्यशून्या ॥ १४ ॥

nidrā na vidyā grahaṇaṁ na vidyā
gṛhṇāti kiñcanna yathārthabodhe |
nidrāpadārthagrahaṇetarā syāt
cideva vidyā vilasantyaśūnyā || 14 ||

सत्यश्चिदात्मा विविधाकृतिश्चित्

सिद्ध्येत्पृथक्सत्यचितो न भिन्ना ।

भूषाविकाराः किमु सन्ति सत्यं

विना सुवर्णं पृथगत्र लोके ॥ १५ ॥

satyaścidātmā vividhākṛtiścit
siddhyetpṛthaksatyacito na bhinnā |
bhūṣāvikārāḥ kimu santi satyaṁ
vinā suvarṇaṁ pṛthagatra loke || 15 ||

तद्युष्मदोरस्मदि संप्रतिष्ठा
　　तस्मिन्विनष्टेऽस्मदि मूलबोधात्।
तद्युष्मदस्मन्मतिवर्जितैका
　　स्थितिर्ज्वलन्ती सहजात्मनः स्यात्॥ १६ ॥

tadyuṣmadorasmadi sampratiṣṭhā
　　tasminvinaṣṭe'smadi mūlabodhāt |
tadyuṣmadasmanmativarjitaikā
　　sthitirjvalantī sahajātmanaḥ syāt || 16 ||

भूतं भविष्यच्च भवत्स्वकाले
　　तद्वर्तमानस्य विहाय तत्त्वम्।
हास्या न किं स्याद्गतभाविचर्चा
　　विनैकसंख्यां गणनेव लोके ॥ १७ ॥

bhūtaṁ bhaviṣyacca bhavatsvakāle
　　tadvartamānasya vihāya tattvam |
hāsyā na kiṁ syādgatabhāvicarcā
　　vinaikasaṅkhyāṁ gaṇaneva loke || 17 ||

क्व भाति दिक्कालकथा विनास्मान्
　　दिक्काललीलेह वपुर्वयं चेत्।
न क्वापि भामो न कदापि भामो
　　वयं तु सर्वत्र सदा च भामः ॥ १८ ॥

kva bhāti dikkālakathā vināsmān
　　dikkālalīleha vapurvayaṁ cet |
na kvāpi bhāmo na kadāpi bhāmo
　　vayaṁ tu sarvatra sadā ca bhāmaḥ || 18 ||

देहात्मभावे ज्ञजडौ समाना

वेकस्य देहे हृदि दीप्त आत्मा ।

आक्रम्य देहं च जगच्च पूर्णः

परस्य मेयं तनुमात्रमात्मा ॥ १९ ॥

dehātmabhāve jñajaḍau samānā
vekasya dehe hṛdi dīpta ātmā ।
ākramya dehaṁ ca jagacca pūrṇaḥ
parasya meyaṁ tanumātramātmā ।। 19 ।।

अज्ञस्य विज्ञस्य च विश्वमस्ति

पूर्वस्य दृश्यं जगदेव सत्यम् ।

परस्य दृश्याश्रयभूतमेकं

सत्यं प्रपूर्णं प्रविभात्यरूपम् ॥ २० ॥

ajñasya vijñasya ca viśvamasti
pūrvasya dṛśyaṁ jagadeva satyam ।
parasya dṛśyāśrayabhūtamekaṁ
satyaṁ prapūrṇaṁ pravibhātyarūpam ।। 20 ।।

विधेः प्रयत्नस्य च कोऽपि वाद

स्तयोर्द्वयोर्मूलमजानतां स्यात् ।

विधेः प्रयत्नस्य च मूलवस्तु

सञ्जानतां नैव विधिर्न यत्नः ॥ २१ ॥

vidheḥ prayatnasya ca ko'pi vāda
stayordvayormūlamajānatāṁ syāt ।
vidheḥ prayatnasya ca mūlavastu
sañjānatāṁ naiva vidhirna yatnaḥ ।। 21 ।।

यदीशितुर्वीक्षणमीक्षितारं
अवीक्ष्य तन्मानसिकेक्षणं स्यात्।
न द्रष्टुरन्यः परमो हि तस्य
वीक्षा स्वमूले प्रविलीय निष्ठा॥ २२॥

yadīśiturvīkṣaṇamīkṣitāraṁ
avīkṣya tanmānasikekṣaṇaṁ syāt |
na draṣṭuranyaḥ paramo hi tasya
vīkṣā svamūle pravilīya niṣṭhā || 22 ||

आत्मानमीक्षेत परं प्रपश्ये-
दित्यागमोक्तेः सुलभो न भावः।
नात्मैव दृश्यो यदि का कथेशे
स्वयं तदन्नीभवनं तदीक्षा॥ २३॥

ātmānamīkṣeta paraṁ prapaśye-
dityāgamokteḥ sulabho na bhāvaḥ |
nātmaiva dṛśyo yadi kā katheśe
svayaṁ tadannībhavanaṁ tadīkṣā || 23 ||

धिये प्रकाशं परमो वितीर्य
स्वयं धियोऽन्तः प्रविभाति गुप्तः।
धियं परावर्त्य धियोऽन्तरेऽत्र
संयोजनान्नेश्वरदृष्टिरन्या॥ २४॥

dhiye prakāśaṁ paramo vitīrya
svayaṁ dhiyo'ntaḥ pravibhāti guptaḥ |
dhiyaṁ parāvartya dhiyo'ntare'tra
saṁyojanānneśvaradṛṣṭiranyā || 24 ||

न वक्ति देहोऽहमिति प्रसुप्तौ

न कोऽपि नाभूवमिति प्रवक्ति ।

यत्रोदिते सर्वमुदेति तस्य

धियाऽहमः शोधय जन्मदेधम् । २५ ॥

na vakti deho'hamiti prasuptau
na ko'pi nābhūvamiti pravakti |
yatrodite sarvamudeti tasya
dhiyā'hamaḥ śodhaya janmadedham| 25 ||

देहो न जानाति सतो न जन्म

देहप्रमाणोऽन्य उदेति मध्ये ।

अहंकृतिग्रन्थिविबन्धसूक्ष्म

शरीरचेतोभवजीवनामा । २६ ॥

deho na jānāti sato na janma
dehapramāṇo'nya udeti madhye |
ahaṅkṛtigranthivibandhasūkṣma
śarīracetobhavajīvanāmā | 26 ||

रूपोद्भवो रूपततिप्रतिष्ठो

रूपाशनो धूतगृहीतरूपः ।

स्वयं विरूपः स्वविचारकाले

धावत्यहङ्कारपिशाच एषः ॥ २७ ॥

rūpodbhavo rūpatatipratiṣṭho
rūpāśano dhūtagṛhītarūpaḥ |
svayaṁ virūpaḥ svavicārakāle
dhāvatyahaṅkārapiśāca eṣaḥ || 27 ||

भावेऽहमः सर्वमिदं विभाति
लयेऽहमो नैव विभाति किञ्चित्।
तस्मादहंरूपमिदं समस्तं
तन्मार्गणं सर्वजयाय मार्गः॥ २८ ॥

bhāve'hamaḥ sarvamidaṁ vibhāti
laye'hamo naiva vibhāti kiñcit |
tasmādahaṁrūpamidaṁ samastaṁ
tanmārgaṇaṁ sarvajayāya mārgaḥ || 28 ||

सत्या स्थितिर्नाहमुदेति यत्र
तच्चोदयस्थानगवेषणेन।
विना न नश्येद्यदि तन्न नश्येत्
स्वात्मैक्यरूपा कथमस्तु निष्ठा॥ २९॥

satyā sthitirnāhamudeti yatra
taccodayasthānagaveṣaṇena |
vinā na naśyedyadi tanna naśyet
svātmaikyarūpā kathamastu niṣṭhā || 29 ||

कूपे यथा गाढजले तथान्तः
निमज्ज्य बुद्ध्या शितया नितान्तम्।
प्राणं च वाचं च नियम्य चिन्वन्
विन्देन्निजाहंकृतिमूलरूपम्॥ ३० ॥

kūpe yathā gāḍhajale tathāntaḥ
nimajjya buddhyā śitayā nitāntaṁ |
prāṇaṁ ca vācaṁ ca niyamya cinvan
vindennijāhaṅkṛtimūlarūpam || 30 ||

मौनेन मज्जन्मनसा स्वमूल-

चर्चैव सत्यात्मविचारणं स्यात्।

एषोऽहमेतन्न मम स्वरूपम्

इति प्रमा सत्यविचारणाङ्गम्॥ ३१॥

maunena majjanmanasā svamūla-
carcaiva satyātmavicāraṇaṁ syāt |
eṣo'hametanna mama svarūpam
iti pramā satyavicāraṇāṅgam || 31 ||

गवेषणात् प्राप्य हृदन्तरं तत्

पतेदहन्ता परिभुग्नशीर्षा।

अथाहमन्यत्स्फुरति प्रकृष्टं

नाहंकृतिस्तत्परमेव पूर्णम्। ३२॥

gavaṣaṇāt prāpya hṛdantaraṁ tat
patedahantā paribhugnaśīrṣā |
athāhamanyatsphurati prakṛṣṭaṁ
nāhaṅkṛtistatparameva pūrṇam | 32 ||

अहंकृतिं यो लसति ग्रसित्वा

किं तस्य कार्यं परिशिष्टमस्ति।

किञ्चिद्विजानाति स नात्मनोऽन्यत्

तस्य स्थितिं भावयितुं क्षमः कः॥ ३३॥

ahaṅkṛtiṁ yo lasati grasitvā
kiṁ tasya kāryaṁ pariśiṣṭamasti |
kiñcidvijānāti sa nātmano'nyat
tasya sthitiṁ bhāvayituṁ kṣamaḥ kaḥ || 33 ||

आह स्फुटं तत्त्वमसीति वेदः

तथाप्यसंप्राप्य परात्मनिष्ठाम् ।

भूयो विचारो मतिदुर्बलत्वं

तत्सर्वदा स्वात्मतया हि भाति ॥ ३४ ॥

āha sphuṭaṁ tattvamasīti vedaḥ
tathāpyasamprāpya parātmaniṣṭhām |
bhūyo vicāro matidurbalatvaṁ
tatsarvadā svātmatayā hi bhāti || 34 ||

न वेद्म्यहं मामुत वेद्म्यहं माम्

इति प्रवादो मनुजस्य हास्यः ।

दृग्दृश्यभेदात्किमयं द्विधात्मा

स्वात्मैकतायां हि धियां न भेदाः ॥ ३५ ॥

na vedmyahaṁ māmuta vedmyahaṁ mām
iti pravādo manujasya hāsyaḥ |
dṛgdṛśyabhedātkimayaṁ dvidhātmā
svātmaikatāyāṁ hi dhiyāṁ na bhedāḥ || 35 ||

हृत्प्राप्य सद्धामनिजस्वरूपे

स्वभावसिद्धेऽनुपलभ्य निष्ठाम् ।

मायाविलासः सदसत्सरूप-

विरूपनानैकमुखप्रवादाः ॥ ३६ ॥

hṛtprāpya saddhāmanijasvarūpe
svabhāvasiddhe'nupalabhya niṣṭhām |
māyāvilāsaḥ sadasatsarūpa
virūpanānaikamukhapravādāḥ || 36 ||

सिद्धस्य वित्तिः सत एव सिद्धिः
स्वप्नोपमानाः खलु सिद्धयोऽन्याः ।
स्वप्नः प्रबुद्धस्य कथं नु सत्यः
सति स्थितः किं पुनरेति मायाम् ॥ ३७ ॥

siddhasya vittiḥ sata eva siddhiḥ
svapnopamānāḥ khalu siddhayo'nyāḥ |
svapnaḥ prabuddhasya kathaṁ nu satyaḥ
sati sthitaḥ kiṁ punareti māyām || 37 ||

सोऽहंविचारो वपुरात्मभावे
साहाय्यकारी परमार्गणस्य ।
स्वात्मैक्यसिद्धौ स पुनर्निरर्थो
यथा नरत्वप्रमितिर्नरस्य ॥ ३८ ॥

so'haṁvicāro vapurātmabhāve
sāhāyyakārī paramārgaṇasya |
svātmaikyasiddhau sa punarnirartho
yathā naratvapramitirnarasya || 38 ||

द्वैतं विचारे परमार्थबोधे
त्वद्वैतमित्येष न साधुवादः ।
गवेषणात् प्राग् दशमे विनष्टे
पश्चाच्च लब्धे दशमत्वमेकम् ॥ ३९ ॥

dvaitaṁ vicāre paramārthabodhe
tvadvaitamityeṣa na sādhuvādaḥ |
gaveṣaṇāt prāg daśame vinaṣṭe
paścācca labdhe daśamatvamekam || 39 ||

करोमि कर्मेति नरो विजानन्

बाध्यो भवेत् कर्मफलं च भोक्तुम् ।

विचारधूता हृदि कर्तृता चेत्

कर्मत्रयं नश्यति सैव मुक्तिः ॥ ४० ॥

karomi karmeti naro vijānan
bādhyo bhavet karmaphalaṁ ca bhoktum |
vicāradhūtā hṛdi kartṛtā cet
karmatrayaṁ naśyati saiva muktiḥ || 40 ||

बद्धत्वभावे सति मोक्षचिन्ता

बन्धस्तु कस्येति विचारणेन ।

सिद्धे स्वयं स्वात्मनि नित्यमुक्ते

क्व बन्धचिन्ता क्व च मोक्षचिन्ता ॥ ४१ ॥

baddhatvabhāve sati mokṣacintā
bandhastu kasyeti vicāraṇena |
siddhe svayaṁ svātmani nityamukte
kva bandhacintā kva ca mokṣacintā || 41 ||

रूपिण्यरूपिण्युभयात्मिका च

मुक्तिस्त्रिरूपेति विदो वदन्ति ।

इदं त्रयं या विविनक्त्यहन्धीः

तस्याः प्रणाशः परमार्थमुक्तिः ॥ ४२ ॥

rūpiṇyarūpiṇyubhayātmikā ca
muktistrirūpeti vido vadanti |
idaṁ trayaṁ yā vivinaktyahandhīḥ
tasyāḥ praṇāśaḥ paramārthamuktiḥ || 42 ||

सद्दर्शनं द्राविडवाङ्निबद्धं

महर्षिणा श्रीरमणेन शुद्धम् ।

प्रबन्धमुत्कृष्टममर्त्यवण्याम्

अनूद्य वासिष्ठमुनिर्व्यतानीत् ॥ ४३ ॥

saddarśanaṁ drāviḍavāṅ nibaddhaṁ
maharṣiṇā śrīramaṇena śuddham |
prabandhamutkṛṣṭamamartyavaṇyām
anūdya vāsiṣṭhamunirvyatānīt || 43 ||

सत्तत्वसारं सरलं दधाना

मुमुक्षुलोकाय मुदं ददाना ।

अमानुषश्रीरमणीयवाणी-

मयूखभित्तिर्मुनिवाग् विभाति ॥ ४४ ॥

sattatvasāraṁ saralaṁ dadhānā
mumukṣalokāya mudaṁ dadānā |
amānuṣaśrīramaṇīyavāṇī-
mayūkhabhittir munivāg vibhāti || 44 ||